उपशास्त्री

04.09.20
2

मारकमुक्तिः मारकत्वमाह —

सत्यपि स्वेन सम्बन्धे न हन्ति शुभभुक्तिषु।
हन्ति सत्यप्यसम्बन्धे मारकः पापभुक्तिषु ॥

अन्वयः — स्वेन सम्बन्धे सत्यपि मारकः शुभभुक्तिषु न हन्ति। असम्बन्धे सत्यपि पापभुक्तिषु हन्ति।

संस्कृत — स्वेन आत्मना सम्बन्धे सत्यपि मारको मारकग्रहः शुभभुक्तिषु शुभग्रहान्तर्दशासु न हन्ति न मारयति। सत्यपि असम्बन्धे सम्बन्धाभावे पापभुक्तिषु पापग्रहान्तर्दशासु हन्ति मारयति। अत्राशयो विद्यते यत् पापग्रहसम्बन्धिशुभग्रहस्यान्तर्दशासु अपि न म्रियते, परञ्च तत्र पापग्रहान्तर्दशासु म्रियते इत्यलम्।

क्षेमङ्करी — मारक ग्रह की महादशा हो, तो सम्बन्ध रहते हुए भी शुभ की अन्तर्दशा में मरण नहीं होता। जबकि पापी ग्रह से मारक ग्रह का सम्बन्धाभाव में भी मरण होता है, अर्थात सम्बन्ध रहने पर अवश्य मरण होता है।

विमर्श — मारक ग्रह की महादशा सम्बन्धी शुभ ग्रहों की अन्तर्दशा में भी मारक नहीं होता है। जबकि सम्बन्ध न होने पर भी पापग्रहों की अन्तर्दशा आने पर मारक हो जाता है। जब शुभ ग्रह मृत्युदायक नहीं होता है तो उसका सम्बन्ध पापी महादशा नाथ से हो या न हो, मृत्युतुल्य या मृत्युरूपी कष्ट होने का तो प्रश्न ही नहीं उठता है। लेकिन श्लोक में कहा गया है कि पापी दशेश में उन शुभ ग्रहों का अन्तर आने पर उनका सम्बन्ध चाहे दशानाथ से न हो, तो भी मारक हो जाता है।

उपशास्त्री

04.09.20

1

अथ पापीदशेशानां भुक्तिविशेषतामाह —

भवन्ति मिश्रफलदा भुक्तयो योगकारिणाम्।
अत्यन्तपापफलदा भवन्ति तदसंयुजाम्॥

अन्वयः — पूर्वोक्तं यत् तत् संयुक् शुभभुक्तयः मिश्रफलदा भवन्ति। तथा च तदसंयुजाम् योगकारिणां भुक्तयः अत्यन्तपापफलदा भवन्ति।

संस्कृत — पूर्वोक्तं यत् तत्संयुक् शुभभुक्तयः दशाधिपस्य सम्बन्धी शुभग्रहान्तर्दशाः, मिश्रफलदा शुभाशुभफलं ददन्ति। तथा च तदसंयुजां तत्सम्बन्ध रहितानां योगकारिणां भुक्तयः अन्तर्दशाः अत्यन्तपापफलदाः अतिशयेन अनिष्टफलप्रदाः भवन्ति। अत्राशयो विद्यते यत् यदि पापग्रहाः त्रिषडायेशाष्टमेशाः तदा तेषां दशायां सम्बन्धरहितशुभग्रहाणामन्तर्दशाः अतिशयेनानिष्टफलप्रदा भवन्ति। तत्र सम्बन्धसहितानां ग्रहाणाम् अन्तर्दशाः मिश्रफलदा भवन्ति।

क्षेमङ्करी — असम्बन्धी योगकारक के अन्तर में अत्यन्त पापफल होता है। ऐसा ही सम्बन्धी योगकारक के अन्तर में पूर्ववत् शुभ-पापमिश्रफल कुछ शुभाधिक होता है।

विमर्श — पाप ग्रह की महादशा में सम्बन्धी शुभ ग्रहों की अन्तर्दशा आने पर मिश्रित फल होता है और असम्बन्धी योग कारक ग्रह की अन्तर्दशा आए, तो अत्यन्त अशुभ फल घटित होता है।

1. पापग्रह की महादशा में असम्बन्धी शुभ ग्रह की अन्तर्दशा में भी अशुभ फल ही मिलता है, एवं सम्बन्धी शुभग्रह की अन्तर्दशा में मिश्रित फल होता है।
2. अन्तर्दशेश योग कारक है और पापी महादशा नाथ से सम्बन्ध रखता है, तो मिश्रित फल ही होगा।


डॉ० सुधीर कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ० सं० महावि० सुखसेना,
पूर्णियाँ।

वस्तुनिष्ठप्रश्नाः
शास्त्री-I, II

04.09.20
3

(1) मेघतः पतितानि मुक्ताफलानि कुत्र गच्छन्ति?
उत्तरम्- मध्ये देवयोनयः समपहरन्ति।
(2) नागजमुक्ता कुत्र भवन्ति?
उत्तरम्- फणाग्रभागे।
(3) मेघ वर्षति ईदृशः?
उत्तरम्- रजतपात्रे मुक्ताफलानि बहिस्थापने।
(4) नागजमुक्ताफलं किं विदधाति धारकम्?
उत्तरम्- विषं नाशयति।
(5) वंशजं मुक्ताफलं कीदृशं भवति?
उत्तरम्- कर्पूरधवलम्।
(6) शङ्खोत्पन्नं मुक्ताफलं भवति—
उत्तरम्- भ्राजिष्णुः।
(7) मुक्तमणिरचिता माला कतिविधा?
उत्तरम्- चतुर्दशविधा।
(8) 'इन्दुच्छन्दं' नाम्नी माला कस्य भूषणं भवति?
उत्तरम्- देवतानाम्।
(9) 'एकावली नाम यथेष्टसङ्ख्या हस्तप्रमाणा मणिविप्रयुक्ता'- प
कुत उद्धृतम्?
उत्तरम्- बृहत्संहितातः।
(10) कतिभि रत्नैः पद्मरागस्योत्पत्तिर्भवति?
उत्तरम्- त्रिभिः।
(11) एकपलपरिमितस्य पद्मरागस्य मूल्यं कियत्?
उत्तरम्- षड्विंशतिसहस्राणि।
(12) अर्द्धपलपरिमितस्य पद्मरागस्य मूल्यं कियत्?
उत्तरम्- द्वादशसहस्ररुप्यकाणि।
(13) कर्षैक तुल्य पद्मरागस्य मूल्यं कियत्?
उत्तरम्- षटसहस्राणि।

P.T.O

04.09.20
-4

(14) अष्टौ मासातुल्यपद्मरागस्य मूल्यं कियत् ?

उत्तरम्- त्रिसहस्राणि ।

(15) चतुर्मासातुल्यस्य पद्मरागस्य मूल्यं भवति ?

उत्तरम् - सहस्रैकम् ।

(16) द्विमासातुल्यपद्मरागस्य मूल्यं भवति ?

उत्तरम् - पञ्चशतं रूप्यकाणि ।

(17) कस्मिन् कार्ये मरकतधारणं शुभम् ?

उत्तरम्- देवकार्ये ।

(18) कीदृशः दीपः ऐश्वर्यकरं भवति ?

उत्तरम्- मिलिताशिखः ।

(19) केन काष्ठेन दन्तधावने लक्ष्मीप्राप्तिः ?

उत्तरम्- शिरीषकाष्ठेन ।

(20) अर्थसिद्धिः केन दन्तधावनेन भवति ?

उत्तरम्- पर्करीवृक्षकाष्ठेन ।

(21) आरोग्यार्थं केन काष्ठेन दन्तधावनं कर्तव्यम् ?

उत्तरम् - बदरीकाष्ठेन ।

(22) केन काष्ठेन दन्तधावने धनलाभो भवति ?

उत्तरम्- निम्बकाष्ठेन ।

(23) का दिशा मुक्तसूर्या ?

उत्तरम्- ऐशानि दिशा ।

(24) का दिशा ऐश्वर्यसूर्या ?

उत्तरम्- अग्निदिशा ।

डॉ० सुधिर कुमार
सहा० प्राध्यापक (ज्योतिष)
रा० उ० सं० महावि० सुखसेना,
पूर्णियाँ ।